M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.

Ser. 859

Title: Megha Duta

Sam 1709

1591

859

मेघदूत (Text)

Megha - Dūta (Text)	Title
Kālidāsa	Author
	Editor
Sam. 1709	Year, Vols.
	Publisher
859	Remarks

॥ॐ नमः श्रीगणेशाय॥ ॥कश्चित्कांताविरहगुरुणास्वाधिकारप्रमत्तःशापेनास्तंगमित
महिमावर्षभोग्येनभर्त्तुः।यक्षश्चक्रेजनकतनयास्नानपुण्योदकेषुस्निग्धछायातरुषुवसतिं
रामगिर्याश्रमेषु॥१॥तस्मिन्नद्रौकतिचिदबलाविप्रयुक्तःसकामीनीत्वामासान्कनकवल
यभ्रंशरिक्तप्रकोष्ठः।आषाढस्यप्रथमदिवसेमेघमाश्लिष्टसानुंवप्रक्रीडापरिणतगजप्रे
क्षणीयंददर्श॥२॥तस्यस्थित्वाकथमपिपुरःकेतकाधानहेतोरंतर्बाष्पश्चिरमनुचरोराजरा
जस्यदध्यौ।मेघालोकेभवतिसुखिनोप्यन्यथावृत्तिचेतःकंठाश्लेषप्रणयिनिजनेकिंपुनर्दू
रसंस्थे॥३॥प्रत्यासन्नेनभसिदयिताजीवितालंबनार्थीजीमूतेनस्वकुशलमयींहारयिष्यन् मेघदू०
प्रवृत्तिं।सप्रत्यग्रैःकुटजकुसुमैःकल्पितार्घायतस्मैप्रीतिःप्रीतःप्रमुखवचनंस्वागतंव्या
जहार॥४॥धूमज्योतिःसलिलमरुतांसन्निपातःक्वमेघःसंदेशार्थाःक्वपटुकरणैःप्राणिभिः १

मे०

प्रापणीयाः॥इत्यौत्सुक्यादपरिगणयन्गुह्यकस्तंययाचेकामार्ताहिप्रकृतिकृपणाश्चेतनाचेत
नेषु॥५॥जातंवंशेभुवनविदितेपुष्करावर्तकानांजानामित्वांप्रकृतिपुरुषंकामरूपंमघोन
ः॥तेनार्थित्वंत्वयिविधिवशाद्दूरबंधुर्गतोहंयाच्ञामोघावरमधिगुणेनाधमेलब्धकामा॥६॥सं
तप्तानांत्वमसिशरणंतत्पयोदःप्रियायाःसंदेशंमेहरधनपतिक्रोधविश्लेषितस्यागंतव्या
तेवसतिरलकानामयक्षेश्वराणांबाह्योद्यानस्थितहरशिरश्चंद्रिकाधौतहर्म्या॥७॥त्वामारूढं
वपवनपदवीमुद्गृहीतालकांताःप्रेक्षिष्यंतेपथिकवनिताःप्रत्ययादाश्वसंत्यः॥कःसंनद्धेविरह
विधुरांत्वय्युपेक्षेतजायांनस्यादन्योप्यहमिवजनोयःपराधीनवृत्तिः॥८॥मंदंमंदंनुदतिपवन
श्चानुकूलोयथात्वांवामश्चायंनदतिमधुरंचातकस्तेसगर्वः॥गर्भाधानक्षणपरिचयान्नूनमा
बद्धमालाःसेविष्यंतेनयनसुभगंखेभवंतंबलाकाः॥९॥तांचावश्यंदिवसगणनातत्परामेक

पत्नीमव्यापन्नामविहितगतिर्द्रक्ष्यसिभ्रातृजायां॥आशाबंधःकुसुमसदृशंप्रायशोह्यंगनानां
सद्यःपातिप्रणयिहृदयंविप्रयोगेरुणद्धि॥१०॥कर्तुंयच्चप्रभवतिमहीमुच्छिलींध्रामवंध्यांतच्छ्रुत्वाते
श्रवणसुभगंगर्जितंमानसोत्काः॥आकैलासाद्बिसकिसलयच्छेदपाथेयवंतःसंपत्स्यंतेनभसि
भवतोराजहंसाःसहायाः॥११॥आपृच्छस्वप्रियसखममुंतुंगमालिंग्यशैलंवंद्यैःपुंसांरघुपतिपदैरंकि
तंमेखलासु॥कालेकालेभवतिभवतोयस्यसंयोगमेत्यस्नेहव्यक्तिश्चिरविरहजंमुंचतोबाष्पमु
ष्णं॥१२॥मार्गंतावच्छृणुकथयतस्त्वत्प्रयाणानुरूपं।संदेशंमेतदनुजलदश्रोष्यसिश्रोत्रपेयं।खिन्नःखि
न्नःशिखरिषुपदंन्यस्यगंतासियत्रक्षीणः परिलघुपयःस्रोतसांचोपयुज्य॥१३॥अद्रेःशृंगंहर
तिपवनःकिंस्विदित्युन्मुखीभिःदृष्टोत्साहश्चकितचकितंमुग्धसिद्धांगनाभिः॥स्थानादस्मात्सरस मेघदू°
निचुलादुत्पतोदङ्मुखःखंदिङ्नागानांपथिपरिहरन्स्थूलहस्तावलेपान्॥१४॥रत्नच्छायाव्यतिकर २

मा१
इवप्रेक्ष्यमेतत्पुरस्ताद्वल्मीकाग्रात्प्रभवतिधनुःखंडमाखंडलस्य।येनश्यामंवपुरतितरांकांतिमापत्स्य
पि तेतेबर्हेणेवस्फुरितरुचिनागोपवेषस्यविष्णोः॥१५॥त्वय्यायत्तंकृषिफलमितिभ्रूविकारानभिज्ञैः॥प्री
तिस्निग्धैर्जनपदवधूलोचनैःपीयमानः॥सद्यःसीरोत्कषणसुरभिक्षेत्रमारुह्यमालंकिंचित्पश्चाद्व
जलघुगतिर्भूयएवोत्तरेण॥१६॥त्वामासारप्रशमितवनोपप्लवंसाधुमूर्ध्नावक्ष्यत्यध्वश्रमपरिगतंसानुमा
नाम्रकूटः।नक्षुद्रोपिप्रथमसुकृतापेक्षयासंश्रयायप्राप्तेमित्रेभवतिविमुखःकिंपुनर्यस्तथोच्चैः॥१७॥छ
न्नोपांतःपरिणतफलद्योतिभिःकाननाम्रैस्त्वय्यारूढेशिखरमचलःस्निग्धवेणीसवर्णे।नूनंयास्यत्य या
मरमिथुनप्रेक्षणीयामवस्थांमध्येश्यामःस्तनइवभुवःशेषविस्तारपांडुः॥१८॥स्थित्वातस्मिन्वनचरवधूभु
क्तकुंजेमुहूर्त्तंतोयोत्सर्गद्रुततरगतिस्तत्परंवर्त्मतीर्णः।रेवांद्रक्ष्यस्युपलविषमेविंध्यपादेविशी
र्णांभक्तिच्छेदैरिवविरचितांभूतिमंगेगजस्य॥१९॥तस्यास्तिक्तैर्वनगजमदैर्वासितंवांतवृष्टिर्जंबूकुं
र्गी स्या

जप्रतिहतरयंतोयमादायगछेः॥अंतःसारंघनतुलयितुंनानिलःशक्ष्यतित्वांरिक्तःसर्वोभवतिहि
लघुःपूर्णतागौरवाय॥२१॥नीपंदृष्ट्वाहरितकपिशंकेसरैरर्द्धरूढैराविर्भूतप्रथममुकुलाःकंद
लीश्चानुकछं॥दग्धारण्येष्वधिकसुरभिंगंधमाघ्रायचोर्व्याःसारंगास्तेजललवमुचःसूचयिष्यंतिमार्गं
॥२२॥अंभोबिंदुग्रहणरभसांश्चातकान्वीक्षमाणाःश्रेणीभूताःपरिगणनयानिर्दिशंतोबलाकाः॥ताम
साद्यस्तनितसमयेमानयिष्यंतिसिद्धाःसोत्कंपानिप्रियसहचरीसंभ्रमालिंगितानि॥२३॥उत्पश्यामिद्रु
तमपिसखेमत्प्रियार्थंयियासोःकालक्षेपंककुभसुरभौपर्वतेपर्वतेते॥शुक्लापांगैःस
जलनयनैःस्वागतीकृत्यकेकाःप्रत्युद्यातःकथमपिभवान्गंतुमाशुव्यवस्येत्॥२४॥पांडुछायोपवनवृ
तयःकेतकैःसूचिभिन्नैर्नीडारंभैर्गृहबलिभुजामाकुलग्रामचैत्याः॥त्वय्यासन्नेफलपरिणतिश्यामजं
बूवनांतास्संपत्स्यंतेकतिपयदिनस्थायिहंसादशार्णाः॥२५॥तेषांदिक्षुप्रथितविदिशालक्षणां

मेघदू
३

राजधानीं॥गत्वासद्यःफलमविकलंकामुकत्वस्यलब्धा॥तीरोपांतस्तनितसुभगंपास्यसिस्वा
दुयस्मात्सभ्रूभंगंमुखमिवपयोवेत्रवत्याश्चलोर्मि॥२६॥नीचैराख्यंगिरिमधिवसेस्तत्रविश्रामहे
तोस्त्वत्संपर्कात्पुलकितमिवप्रौढपुष्पैःकदंबैः॥यःपण्यस्त्रीरतिपरिमलोद्गारिभिर्नागरा
णामुद्दामानिप्रथयतिशिलावेश्मभिर्यौवनानि॥२७॥विश्रांतःसन्व्रजवननदीतीरजाता
निसिंचन्नुद्यानानांनवजलकणैर्यूथिकाजालकानि॥गंडस्वेदापनयनरुजाक्लांतकर्णो
त्पलानांछायादानात्क्षणपरिचितःपुष्पलावीमुखानां॥२८॥वक्रःपंथायदपिभवतःप्र
स्थितस्योत्तराशांसौधोत्संगप्रणयविमुखोमास्मभूरुज्जयिन्याः॥विद्युद्दामस्फुरितचकितै
स्तत्रपौरांगनानांलोलापांगैर्यदिनरमसेलोचनैर्वंचितोसि॥२९॥वीचिक्षोभस्तनितविहग
श्रेणिकांचीगुणायाःसंसर्पंत्याःस्खलितसुभगंदर्शितावर्त्तनाभेः॥निर्विंध्यायापथिभव

रसाभ्यंतरंसन्निपत्यस्त्रीणामाद्यंप्रणयवचनंविभ्रमोहिप्रियेषु॥३०॥वेणीभूतप्रतनुसलि
लानामतीतस्यसिंधुःपांडुछायातटरुहतरुभ्रंशिभिर्जीर्णपर्णैः।सौभाग्यंतेसुभगविरहाव न
स्थयाव्यंजयंतीकार्श्यंयेनत्यजतिविधिनासत्वयैवोपपाद्यः॥३१॥प्राप्यावंतीनुदयनकथा
कोविदग्रामवृद्धान्पूर्वोद्दिष्टामनुसरपुरींश्रीविशालांविशालां।स्वल्पीभूतेसुचरितफले
स्वर्गिणांगांगतानांशेषैःपुण्यैर्हृतमिवदिवःकांतिमत्खंडमेकं॥३२॥दीर्घीकुर्वन्पटुमद
कलंकूजितंसारसानांप्रत्यूषेषुस्फुटितकमलामोदमैत्रीकषायः।यत्रस्त्रीणांहरतिसुरत
ग्लानिमंगानुकूलःशिप्रावातःप्रियतमइवप्रार्थनाचाटुकारः॥३३॥हारांस्तारांस्तरलगुलिका मेघदू
न्कोटिशःशंखशुक्तीःशष्पश्यामान्मरकतमणीनुन्मयूखप्ररोहान्दृष्ट्वायस्यांविपणिरचि ६
तान्विद्रुमाणांचभंगान्संलक्ष्यंतेसलिलनिधयस्तोयमात्रावशेषाः॥३४॥प्रद्योतस्यप्रिय

दुहितरंवत्सराजोऽत्रजह्रेहैमंतालद्रुमवनमभूदत्रतस्यैवराज्ञः।उद्भ्रांतःकिलनलगिरि
स्तंभमुत्पाट्यदर्पादित्यागंतून्रमयतिजनोयत्रबंधूनभिज्ञः॥३५॥जालोद्गीर्णैरुपचितव
पुःकेशसंस्कारधूपैर्बंधुप्रीत्याभवनशिखिभिर्दत्तनृत्योपहारःहर्म्येष्वस्याःकुसुमसुरभि
ष्वध्वखिन्नांतरात्मानीत्वाखेदंललितवनितापादरागांकितेषु॥३६॥भर्तुःकंठच्छविरितिगणैः
सादरंवीक्ष्यमाणःपुण्यंयायास्त्रिभुवनगुरोर्धामचंडीश्वरस्य।धूतोद्यानंकुवलयरजोगंधि
भिर्गंधवत्यास्तोयक्रीडानिरतयुवतिस्नानतिक्तैर्मरुद्भिः॥३७॥अप्यन्यस्मिन्जलधरमहाका
लमासाद्यकालेस्थातव्यंतेनयनविषयंयावदत्येतिभानुः।कुर्वन्संध्याबलिपटहतांशूलि
नःश्लाघनीयामामंद्राणांफलमविकलंलप्स्यसेगर्जितानां॥३८॥पादन्यासक्वणितरसना
स्तत्रलीलावधूतैरत्नछायाखचितवलिभिश्चामरैःक्लांतहस्ताः।वेश्यास्त्वत्तोनखपदसुखान्

ग्राप्यवर्षाग्रबिंदूनामोक्ष्यंते त्वयि मधुकरश्रेणिदीर्घान्कटाक्षान्॥३९॥ पश्चादुच्चैर्भुजतरुवनं
मंडलेनाभिलीनः सांध्यं तेजः प्रतिनवजपापुष्परक्तं दधानः॥ नृत्यारंभे हर पशुपतेरार्द्र
नागाजिनेच्छां शांतोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्या॥४०॥ गच्छंतीनां रमणवसतिं योषितां
तत्र नक्तं रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः॥ सौदामिन्या कनकनिकषस्निग्धया द
र्शयोर्वीं तोयोत्सर्गस्तनितमुखरो मा स्म भूर्विक्लवास्ताः॥४१॥ तां कस्यांचिद्भवनवलभौ सुप्तपा
रावतायां॥ नीत्वा रात्रिं चिरविलसनात्खिन्नविद्युत्कलत्रः॥ दृष्टे सूर्ये पुनरपि भवान्वाहयेद
ध्वशेषं मंदायंते न खलु सुहृदामभ्युपेतार्थकृत्याः॥४२॥ तस्मिन्काले नयनसलिलं योषितां
खंडितानां॥ शांतिं नेयं प्रणयिभिरतो वर्त्म भानोस्त्यजाशु॥ प्रालेयास्रं कमलवदनात्सोपि ह
र्तुं नलिन्याः प्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पाभ्यसूयः॥४३॥ गंभीरायाः पयसि सरितश्चे

त्रि२

मेघदू॰

५

तसीव प्रसन्ने छायात्मापि प्रकृतिसुभगो लप्स्यते ते प्रवेशं॥ तस्मादस्याः कुमुदविशदान्यर्हसि त्वं न धैर्या
नो घीकर्तुं चटुलशफरोद्वर्तनप्रेक्षितानि॥४४॥ तस्याः किंचित्करधृतमिव प्राप्तवानीरशाखं हृत्वा
नीलं सलिलवसनं मुक्तरोधोनितंबं॥ प्रस्थानं ते कथमपि सखे लंबमानस्य भाव्यं ज्ञातास्वादो विवृत
जघनां को विहातुं समर्थः॥४५॥ त्वन्निःस्यंदोच्छ्वसितवसुधागंधसंपर्करम्यः॥ स्रोतोरंध्रध्वनितसुभगं दं
तिभिः पीयमानः॥ नीचैर्वास्यत्युपजिगमिषोर्देवपूर्वं गिरिं ते॥ शीतो वायुः परिणमयिता काननोदुं
बराणां॥४६॥ तत्र स्कंदं नियतवसतिं पुष्पमेघीकृतात्मा पुष्पासारैः स्नपयतु भवान्व्योमगंगा
जलार्द्रैः॥ रक्षाहेतोर्नवशशिभृता वासवीनां चमूनामत्यादित्यं हुतवहमुखे संभृतं तद्धि तेजः॥४७॥
ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानी पुत्रप्रेम्णा कुवलयदलप्रापि कर्णे करोति॥ धौ
तापांगं हरशशिरुचा पावकेस्तं मयूरं पश्चादद्रिग्रहणगुरुभिर्गर्जितैर्नर्तयेथाः॥४८॥ घ्नपाद्ये

२१

६॥

नं शरवणभवं देवमुल्लंघिताध्वा सिद्धद्वंद्वैर्जलकणभयाद्वीणिभिर्मुक्तमार्गः॥ व्यालंबेथाः सुर
भितनयालंभजां मानयिष्यन् स्रोतोमूर्त्या भुवि परिणतां रंतिदेवस्य कीर्तिं॥४९॥ त्वय्यादातुं ज
लमवनते शार्ङ्गिणो वर्णचौरे तस्याः सिंधोः पृथुमपि तनुं दूरभावात्प्रवाहं॥ प्रेक्षिष्यंते गगनगत
यो दूरमावर्ज्य दृष्टीरेकं मुक्तागुणमिव भुवः स्थूलमध्येंद्रनीलं॥५०॥ तामुत्तीर्य व्रज परिचितभ्रूल
ताविभ्रमाणां पक्ष्मोत्क्षेपादुपरिविलसत्कृष्णशारप्रभाणां॥ कुंदक्षेपानुगमधुकरश्रीमुषामा
त्मबिंबं पात्रीकुर्वन् दशपुरवधूनेत्रकौतूहलानां॥५१॥ ब्रह्मावर्तं जनपदमधः छायया गाहमा-
नः क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद्भजेथाः॥ राजन्यानां शितशरशतैर्यत्र गांडीवधन्वा धा
रापातैस्त्वमिव कमलान्यभ्यवर्षन्मुखानि॥५२॥ हित्वा हालामभिमतरसां रेवतीलोचनांकां॥ मेघदू॰
बंधुप्रीत्या समरविमुखो लांगली याः सिषेवे। कृत्वा तासामभिगममपां सौम्य सारस्वतीनामं ६

तः शुद्धस्त्वमपि भविता वर्णमात्रेण कृष्णः॥५३॥ तस्माद्गच्छेरनुकनखलं शैलराजावतीर्णां जह्नोः कन्यां
सगरतनयस्वर्गसोपानपंक्तिं। गौरीवक्त्रभ्रुकुटिरचनां या विहस्येव फेनैः। शंभोः केशग्रहणमक
रोदिंदुलग्नोर्मिहस्ता॥५४॥ तस्याः पातुं सुरगज इव व्योम्नि पश्चार्द्धलंबी त्वं चेदच्छस्फटिकविशदं तर्क
येस्तिर्यगंभः। संसर्पंत्या सपदि भवतः स्रोतसि छायया सा स्यादस्थानोपगतयमुनासंगमेवाभिरा-
मा॥५५॥ आसीनानां सुरभितशिलं नाभिगंधैर्मृगाणां तस्या एव प्रभवमचलं प्राप्य गौरं तुषारैः। वक्ष्य
स्यध्वश्रमविनयने तस्य शृंगे निषण्णः शोभां शुभ्रत्रिनयनवृषोत्खातपंकोपमेयां॥५६॥ तं चेद्वायौ
सरति सरलस्कंधसंघट्टजन्मा बाधेतोल्काक्षपितचमरीबालभारो दवाग्निः। अर्हस्येनं शमयितु
मलं वारिधारासहस्रैरापन्नार्तिप्रशमनफलाः संपदो ह्युत्तमानां॥५७॥ ये संरंभोत्पतनरभसाः स्वांग
भंगाय तस्मिन्मुक्ताध्वानं सपदि शरभा लंघयेयुर्भवंतं। तान्कुर्वीथास्तुमुलकरकावृष्टिहासाव-

कीर्णान्के वा न स्युः परिभवपदं निष्फलारंभयत्नाः ।।५८ तत्र व्यक्तं दृषदि चरणन्यासमर्द्धेंदुमौ
लेः शश्वत्सिद्धैरुपचितबलिं भक्तिनम्रः परीयाः ।। यस्मिन्दृष्टे करणविगमादूर्द्ध्वमुद्धूतपा
पाः संकल्प्यंते स्थिरगणपदप्राप्तये श्रद्दधानाः ।।५९ शब्दायंते मधुरमनिलैः कीचकाः पूर्यमा
णाः संरक्ताभिस्त्रिपुरविजयो गीयते किंनरीभिः ।। निर्ह्रादी ते मुरज इव चेत्कंदरेषु ध्वनिः स्यात्सं
गीतार्थो ननु पशुपतेस्तत्र भावी समग्रः ।।६० प्रालेयाद्रेरुपतटमतिक्रम्य तांस्तान्विशेषान्हंस
द्वारं भृगुपतियशोवर्त्म यत्क्रौंचरंध्रं तेनोदीचीं दिशमनुसरेस्तिर्यगायामशोभी श्यामः पादो ब
लिनियमनाभ्युद्यतस्येव विष्णोः ।।६१ गत्वा चोर्द्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसंधेः कैलासस्य मेघदू०
त्रिदशवनितादर्पणस्यातिथिः स्याः शृंगोच्छ्रायैः कुमुदविशदैर्यो वितत्य स्थितः खं राशीभू ७
तः प्रतिदिनमिव त्र्यंबकस्याट्टहासः ।।६२ उत्पश्यामि त्वयि तटगते स्निग्धभिन्नांजनाभे सद्यः कृ

त्तद्विरददशनच्छेदगौरस्य तस्य शोभामद्रेः स्तिमितनयनप्रेक्षणीयां भवित्रीं अंसन्यस्ते सति हलभृतो
मेचके वाससीव ।।६३ हित्वा तस्मिन्भुजगवलयं शंभुना दत्तहस्ता क्रीडाशैले यदि च विचरेत्पादचारे
ण गौरी भंगीभक्त्या विरचितवपुः स्तंभितांतर्जलौघः सोपानत्वं कुरु मणितटारोहणायाग्रयायी
।।६४ तत्रावश्यं वलयकुलिशो— द्घट्टनोद्गीर्णतोयं नेष्यंति त्वां सुरयुवतयो यंत्रधारागृहत्वं ताभ्यो मो
क्षस्तव यदि सखे घर्मलब्धस्य न स्यात्क्रीडालोलाः श्रवणपरुषैर्गर्जितैर्भाययेस्ताः ।।६५ हेमांभोजप्रस
वि सलिलं मानसस्याददानः कुर्वन्कामं क्षणमुखपटप्रीतिमैरावतस्य धुन्वन्कल्पद्रुमकिसलया
न्यंशुकानीव वातैर्नानाचेष्टैर्जलदललितैर्निर्विशेस्तं नगेंद्रं ।।६६ तस्योत्संगे प्रणयिन इव स्रस्तगं
गादुकूलां न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन् या वः काले वहति सलिलोद्गारमु
च्चैर्विमाना मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृंदं ।।६७ मंदाकिन्याः सलिलशिशिरैः सेव्य

च्युमनामप्यङ्घ्रिमंदाराणां।विद्युत्वंतंललितवनिताःसेंद्रचापंसचित्राःसंगीतायप्रहतमुरजा
स्निग्धगंभीरघोषंअंतस्तोयंमणिमयभुवस्तुंगमभ्रंलिहाग्राःप्रासादास्त्वांतुलयितुमलंयत्रतैस्तैर्वि
शेषैः॥६८ हस्तेलीलाकमलमलकेबालकुंदानुविद्धंनीतालोध्रप्रसवरजसापांडुतामाननश्रीः
।चूडापाशेनवकुरबकंचारुकर्णेशिरीषंसीमंतेचत्वदुपगमजंयत्रनीपंवधूनां॥६९ शिध्यत्रपा
मादिनकरहयस्पर्धिनोयत्रवाहाःशैलोदग्रास्त्वमिवकरिणोवृष्टिमंतःप्रभेदात्योधाग्रण्यःप्र
तिदशमुखंसंयुगेतस्थिवांसःप्रत्यादिष्टाभरणरुचयश्चंद्रहासव्रणांकैः॥७० यत्रस्त्रीणांप्रिय
तमभुजालिंगनोच्छ्वासितानामंगग्लानिंसुरतजनितांतंतुजालावलंबाः।त्वत्संरोधापगमवि
शदैर्द्योतिताश्चंद्रपादैर्व्यालुंपंतिस्फुटजललवस्यंदिनश्चंद्रकांताः॥७१ यस्यांयक्षाःसित
मणिमयान्येत्यहर्म्यस्थलानिज्योतिश्छायाकुसुमरचितान्युत्तमस्त्रीसहायाः।आसेवंतेमधु

मेघदू०
८

रतिफलंकल्पवृक्षप्रसूतंत्वद्गंभीरध्वनिषुशनकैःपुष्करेष्वाहतेषु॥७२ नेत्रानीताःसततगतिनायद्वि
मानाग्रभूमीरालेख्यानांसलिलकणिकादोषमुत्पाद्यसद्यः।शंकास्पृष्टाइवजलमुचस्त्वादृशाय
त्रजालैर्धूमोद्गारानुकृतिनिपुणाजर्जरानिष्पतंति॥७३ नीवीबंधोच्छ्वसितशिथिलंयत्रयक्षांगना
नांक्षौमंरागादनिभृतकरेष्वाक्षिपत्सुप्रियेषु।अर्चिस्तुंगानभिमुखमपिप्राप्यरत्नप्रदीपान्ह्रीमूढा
नांभवतिविफलप्रेरितश्चूर्णमुष्टिः॥७४ आनंदोत्थंनयनसलिलंयत्रनान्यैर्निमित्तैर्नान्यस्तापःकु
सुमशरजादिष्टसंयोगसाध्यः।नाप्यन्यस्मात्प्रणयकलहाद्विप्रयोगोपपत्तिर्वित्तेशानांनचखलु
वयोयौवनादन्यदस्ति॥७५ अक्षय्यांतर्भवननिधयःप्रत्यहंरक्तकंठैरुद्गायद्भिर्धनपतियशःकिं
नरैर्यत्रसार्धं।वैभ्राजाख्यंविबुधवनितावारमुख्यासहायाबद्धापानंबहिरुपवनंकामिनोनि
र्विशंति॥७६ यत्रोन्मत्तभ्रमरमुखराःपादपानित्यपुष्पाःहंसश्रेणीरचितरसनानित्यपद्मान

ल्लिन्यः केकोत्कंठा भवनशिखिनो नित्यभास्वत्कलापाः नित्यज्योत्स्नाप्रतिहततमोवृत्तिरम्याः प्र-
दोषाः ॥७७॥ मंदाकिन्याः सलिलशिशिरैः सेव्यमाना मरुद्भिर्मंदाराणामनुतटरुहां छायया वारि-
तोष्णाः ॥ अन्वेष्टव्यैः कनकसिकतामुष्टिनिक्षेपगूढैः संक्रीडंते मणिभिरमरप्रार्थिता यत्र कन्याः ।
॥७८॥ वासश्चित्रं मधु नयनयोर्विभ्रमादेशदक्षं पुष्पोद्भेदं सह किशलयैर्भूषणानां विशेषान् ॥
लाक्षारागं चरणकमलन्यासयोग्यं च यस्यामेकः सूते सकलमबलामंडनं कल्पवृक्षः ॥७९॥ गत्यु-
त्कंपादलकपतितैर्यत्र मंदारपुष्पैः पत्रछेद्यैः कनककमलैः कर्णविभ्रंशिभिश्च मुक्ताजालैः
स्तनपरिसरछिन्नसूत्रैश्च हारैः नैशो मार्गः सवितुरुदये सूच्यते कामिनीनां ॥८०॥ मत्वा देवं धन- मेघदू॰
पतिसखं यत्र साक्षाद्वसंतं तस्यास्तीरे रचितशिखरः पेशलैरिंद्रनीलैः ॥ क्रीडाशैलः कनक- ९
कदलीवेष्टनप्रेक्षणीयः ॥ मद्गेहिन्याः प्रिय इति सखे चेतसा कातरेण प्रायश्चापं न वह-

तिभयान्मन्मथः षट्पदज्यं सभ्रूभंगप्रहितनयनैः कामलक्ष्येष्वमोघैस्तस्यारंभश्चतुरवनिताविभ्रमै-
रेव सिद्धः ॥८१॥ तत्रागारं धनपतिगृहादुत्तरेणास्मदीयं दूराल्लक्ष्यं सुरपतिधनुश्चारुणा तोरणेन। य-
स्योद्याने कृतकतनयः कांतया वर्द्धितो मे हस्तप्राप्यस्तबकनमितो बालमंदारवृक्षः ॥८२॥ वापी चा-
स्मिन्मरकतशिलाबद्धसोपानमार्गा हैमैः छिन्ना विकचकमलैः स्निग्धवैडूर्यनालैः ॥ यस्यास्तो-
ये कृतवसतयो मानसं सन्निकृष्टं नाध्यास्यंति व्यपगतशुचस्त्वामपि प्रेक्ष्य हंसाः ॥८३॥ तस्यास्तीरे र-
चितशिखरः पेशलैरिंद्रनीलैः क्रीडाशैलः कनककदलीवेष्टनप्रेक्षणीयः ॥ मद्गेहिन्याः प्रिय-
इति सखे चेतसा कातरेण प्रेक्ष्योपांतस्फुरिततडितं त्वां तमेव स्मरामि ॥८४॥ रक्ताशोकश्चलकि-
सलयः केसरश्चात्र कांतः प्रत्यासन्नौ कुरुबकवृतेर्माधवीमंडपस्य। एकः सख्यास्तव सह म-
या वामपादाभिलाषी कांक्षत्यन्यो वदनमदिरां दोहदच्छद्मनास्याः ॥८५॥ तन्मध्ये च स्फटिकफ-

लिकाकांचनीवासयष्टिर्मूलेबद्धामणिभिरनतिप्रौढवंशप्रकाशैः।तालैःशिंजद्वलयसुभ
गैर्नर्त्तितःकांतयामेयामध्यास्तेदिवसविगमेनीलकंठःसुहृद्वः।।८६।।एभिःसाधोमनसि
निहितैर्लक्षणैर्लक्षयेथाः।द्वारोपांतेलिखितवपुषौशंखपद्मौचदृष्ट्वा।क्षामच्छायंभवन
मधुनामद्वियोगेननूनंसूर्यापायेनखलुकमलंपुष्यतिस्वामभिख्यां।।८७।।गत्वासद्यःकल
भतनुतांशीघ्रसंपातहेतोःक्रीडाशैलेप्रथमकथितेरम्यसानौनिषण्णः।।अर्हस्यंतर्भ
वनपतितांकर्त्तुमल्पाल्पभासंखद्योतालीविलसितनिभांविद्युदुन्मेषदृष्टिं।।८८।।तन्वीश्या
माशिखरदशनापक्वबिंबाधरोष्ठीमध्येक्षामाचकितहरिणीप्रेक्षणानिम्ननाभिः।श्रोणी मेघदू०
भारादलसगमनास्तोकनम्रास्तनाभ्यांयातत्रस्याद्युवतिविषयेसृष्टिराद्येवधातुः।।८९।। १०
तांजानीयाःपरिमितकथांजीवितंमेद्वितीयंदूरीभूतेमयिसहचरेचक्रवाकीमिवैकां।

गाढोत्कंठांगुरुषुदिवसेष्वेषुगच्छत्सुबालांजातांमन्येतुहिनमथितांपद्मिनींवान्यरूपां।।९०।।
युग्मं।।नूनंतस्याःप्रबलरुदितोच्छूननेत्रंप्रियायानिःश्वासानामशिशिरतयाभिन्नवर्णाध
रोष्ठं।हस्तन्यस्तंमुखमसकलव्यक्तिलंबालकत्वादिंदोर्दैन्यंत्वदनुसरणक्लिष्टकांतेर्बिभर्त्ति
।९१।आलोकेतेनिपततिपुरासाबलिव्याकुलावामत्सादृश्यंविरहतनुवाभावगम्यंलि
खंती।पृच्छंतीवामधुरवचनांसारिकांपंजरस्थांकच्चिद्भर्तुःस्मरसिरसिकेत्वंहितस्यप्रियेति।।९
२।।शेषान्मासान्विरहदिवसस्थापितस्यावधेर्वाविन्यस्यंतीभुविगणनयादेहलीमुक्तपुष्पैः।
संयोगंवाहृदयनिहितारंभमास्वादयंतीप्रायेणैतेरमणविरहेष्वंगनानांविनोदाः।।९३।।उत्सं
गेवामलिनवसनेसौम्यनिक्षिप्यवीणांमद्गोत्रांकंविरचितपदंगेयमुद्गातुकामा।तंत्रीमार्द्रां
नयनसलिलैःसारयित्वाकथंचिद्भूयोभूयःस्वयमपिकृतांमूर्छनांविस्मरंती।।९४।।आधि

क्षामांविरहशयनेसंनिषस्सैकपार्श्वांप्राचीमूलेतनुमिवकलामात्रशेषांहिमांशोः॥नीतारात्रिःक्षण
मिवमयासार्द्धमिछारतैर्यातामेवोष्णैर्विरहजनितैरश्रुभिर्यापयंती॥८५॥निश्वासेनाधरकि
शलयक्लेशिनाविक्षिपंतीशुद्धस्नानात्परुषमलकंनूनमागंडलंबिमस्यायोगःसुखमुपनयेत्स्वप्न
जोपीतिनिद्रामाकांक्षंतीनयनसलिलोत्पीडरुद्धावकाशां॥८६॥पादानिंदोरमृतशिशिराञ्जाल
मार्गप्रविष्टान्पूर्वप्रीत्यागतमभिमुखंसन्निवृत्तंतथैव॥चक्षुःखेदात्सलिलगुरुभिःपक्ष्मभिश्छा
श्री॰ दयंतीसाभ्रेह्नीवस्थलकमलिनीनप्रबुद्धानसुप्तां॥८७॥आद्येबद्धाविरहदिवसेयाशिखादामहि
त्वाशापस्यांतेविगलितशुचातांमयोद्वेष्टनीयां॥स्पर्शक्लिष्टामयमितनखेनासकृत्सारयंतींगं
डाभोगात्कठिनविषमामेकवेणींकरेण॥८८॥सासंन्यस्ताभरणमबला मेघदू॰
पेशलंधारयंतीशय्योत्संगेनिहितमसकृद्दुःखदुःखेनगात्रं॥त्वामप्यस्रंनवजलमयंमोच ११

यिष्यत्यवश्यंप्रायःसर्वोभवतिकरुणावृत्तिरार्द्रांतरात्मा॥८९॥जानेसख्यास्तवमयिमनःसंभृतस्नेहम
स्मादित्थंभूतांप्रथमविरहेतामहंतर्कयामि॥वाचालंमांनखलुसुभगंमन्यभावःकरोतिप्रत्यक्षंतेनि
खिलमचिराद्भ्रातरुक्तंमयायत्॥१००॥रुद्धापांगप्रसरमलकैरंजनस्नेहशून्यंप्रत्यादेशादपिचमधुनो ग॥३
चंनिर्विनादांसखीत॥सव्यापाराम्दिनिनतथापीडयेन्मद्वियोगःशंकेरात्रौगुरुतरशु
यनस्था॥स्निग्धःसख्यःक्षणमपिदिवातांनमुंचेतिस्यामेकप्रेत्याह्यात्वतिचजगत्यद्भुतानांप्रवृ
त्तिः॥पत्रंरात्रौजलदशयनासन्नवातायनस्थःकांतंसुप्तेसतिपरिजनेवीतनिद्रामुपेयाः॥९८॥रुद्धापांग
प्रसरमलकैरंजनस्नेहशून्यंप्रत्यादेशादपिचमधुनोविस्मृतभ्रूविलासं॥त्वय्यासन्नेनयनमुपरिस्पंदिशं
श्वर केमृगाक्ष्यामीनक्षोभाच्चलकुवलयश्रीतुलामेष्यतीति॥९९॥वामश्चास्याःकररुहपदैर्मुच्यमानोमदीयैर्मु
क्ताजालंचिरपरिचितंत्याजितोदैवगत्या॥संभोगांतेममसमुचितोहस्तसंवाहनानांयास्यत्यूरुःस

रमकदलीस्तंभयोश्चलत्वं॥४॥तस्मिन्कालेजलदयदिसालब्धनिद्रासुखास्यात्तत्वासीनस्तनितविमु
खोयाममात्रंसहस्वमाभूदस्याःप्रणयिनिमयिस्वप्नलब्धेकथंचित्सद्यःकंठच्युतभुजलताग्रंथिगाढोपगू
ढं॥५॥तामुत्थाप्यस्वजलकणिकाशीतलेनानिलेनप्रत्याश्वस्तांसममभिनवैर्जालकैर्मालतीनांविद्यु
द्गर्भस्तिमितनयनांत्वत्सनाथेगवाक्षेवक्तुंधीरस्तनितवचनैर्मानिनींप्रक्रमेथाः॥६॥भर्तुर्मित्रंप्रियम
विधवेविद्धिमामंबुवाहंतत्संदेशैर्मनसिनिहितैरागतंत्वत्समीपं।योवृंदानित्वरयतिपथिश्राम्यतां
प्रोषितानांमंद्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि॥७॥इत्याख्यातेपवनतनयंमैथिलीवो
न्मुखीसात्वामुत्कंठोच्छ्वसितहृदयावीक्ष्यसंभाव्यचैवंश्रोष्यत्यस्मात्परमवहितासौम्यसीमंति मेघदू॰
नीनांकांतोदंतःसुहृदुपनतःसंगमात्किंचिदूनः॥८॥तामायुष्मन्ममचवचनादात्मनश्चोपक १२
र्तुंब्रूयादेवंतवसहचरोरामगिर्याश्रमस्थः॥अव्यापन्नःकुशलमबलेपृच्छतित्वांवियुक्तःपूर्वाभाष्यं

सुलभविपदांप्राणिनामेतदेव॥९॥अंगेनांगंप्रतनुतनुनागाढतप्तेनतप्तंसास्रेणाश्रुद्रुतमविरतोत्कं
ठमुत्कंठितेनउष्णोछ्वासंसमधिकतरोछ्वासिनादूरवर्तीसंकल्पैस्तैर्विशतिविधिनावैरिणारु
द्धमार्गः॥१०॥शब्दाख्येयंयदपिकिलतेयःसखीनांपुरस्तात्कर्णेलोलःकथयितुमभूदाननस्पर्शलो
भात्।सोऽतिक्रांतःश्रवणविषयंलोचनाभ्यामदृश्यस्त्वामुत्कंठाविरचितपदंमन्मुखेनेदमाह॥११॥श्या
मास्वंगंचकितहरिणीप्रेक्षणेदृष्टिपातांवक्त्रछायांशशिनिशिखिनांबर्हभारेषुकेशान्।उत्पश्या
मिप्रतनुषुनदीवीचिषुभ्रूविलासान्हंतैकस्मिन्क्वचिदपिनतेचंडिसादृश्यमस्ति॥१२॥भित्त्वास
द्यःकिसलयपुटान्देवदारुद्रुमाणांयेतत्क्षीरस्रुतिसुरभयोदक्षिणेनप्रवृत्ताः॥आलिंग्यंतेगु
णवतिमयातेतुषाराद्रिवाताःपूर्वंस्पृष्टंयदिकिलभवेदंगमेभिस्तवेति॥१३॥त्वामालिख्यप्रण
पि॰२ यकुपितांधातुरागैःशिलायामात्मानंतेचरणपतितंयावदिच्छामिकर्तुंअस्रैस्तावन्मुहुरुप

विनिर्दिष्टैरालुप्यमैतैःक्रमस्मिन्नपिनमदनेतेमंगमंनोद्धतांतः॥१४॥धारासिक्तस्थलसुरभिणस्त्व
न्मुखस्यास्यबालेदूरीभूतंप्रतनुमपिमांपंचबाणःक्षणोति॥घर्मांतेस्मिन्विगुणयकथंवासरा
णिव्रजेयुर्दिक्संपक्तप्रविततघनव्यस्तसूर्यातपानि॥१५॥संक्षिप्यंतेक्षणइवकथंदीर्घयामा
स्त्रियामाःसर्वावस्थास्वहरपिकथंमंदमंदातपंस्यात्॥इत्थंचेतश्चटुलनयनेदुर्लभप्रार्थनंमेगा
ढोष्माभिःकृतमशरणंत्वद्वियोगव्यथाभिः॥१६॥त्यात्मानंबहुविगणयन्नात्मनैवावलंबेत
कल्याणित्वमपिसुतरांत्वद्वियोगव्यथाभिः॥मागमःकातरत्वंकस्यात्यंतंसुखमुपनतंदुःखमेकां
ततोवानीचैर्गच्छत्युपरिचदशाचक्रनेमिक्रमेण॥१७॥मामाकाशप्रणिहितभुजंनिर्दयाश्लेषहे
तोर्लब्धायास्तेकथमपिमयास्वप्नसंदर्शनेषु॥पश्यंतीनांनखलुबहुशोनस्थलीदेवतानांमुक्ता मेघदू॰
स्थूलास्तरुकिसलयेष्वश्रुलेशाःपतंति॥१८॥शापांतोमेभुजगशयनादुत्थितेशार्ङ्गपाणौशे १२

त१

षान्मासान्गमयचतुरो लोचनेमीलयित्वापश्चादावांविरहगणितंतंमात्माभिलाषं॥निर्वेक्ष्या
न२ वःपरिणतशरच्चंद्रिकासुक्षपासु॥१९॥भूयश्चाहत्वमपिशयनेकंठलग्नापुरामेनिद्रांगत्वाकिमपिरु
दतीसस्वरंविप्रबुद्धा॥सांतर्हासंकथितमसकृत्पृच्छतश्चत्वयामेदृष्टःस्वप्नेकितवरमयन्कामपि
त्वंमयेति॥२०॥एतस्मान्मांकुशलिनमभिज्ञानदानाद्विदित्वामाकौलीनादसितनयनेमय्यविश्वा
सिनीभूः॥स्नेहानाहुःकिमपिविरहेध्वंसिनस्तेह्यभोगादिष्टेवस्तुन्युपचितरसाःप्रेमराशीभवंति॥२१॥
कच्चित्सौम्यव्यवसितमिदंबंधुकृत्यंत्वयामेप्रत्यादेशंनखलुभवतोधीरतांतर्कयामि॥निःशब्दो
पिप्रदिशसिजलंयाचितश्चातकेभ्यःप्रत्युक्तंहिप्रणयिषुसतामीप्सितार्थक्रियैव॥२२॥आश्वा
स्यैवंप्रथमविरहोदग्रशोकांसखींतांशैलादाशुत्रिनयनवृषोत्खातकूटान्निवृत्तः॥साभिज्ञान
प्रहितकुशलैस्तद्वचोभिर्ममापिप्रातःकुंदप्रसवशिथिलंजीवितंधारयेथाः॥२३॥एतत्कृत्वाप्रि

859

यमत्नुवितप्रार्थनावर्त्मनामेमेसौहार्दाद्वाविधुरतिवामन्यनुक्रोशबुध्या।इष्टान्देशान्नुविचरजल
दत्वाप्रावृषासंभृतश्रीर्मामृद्भवंक्षणमपिचतेविद्युताविप्रयोगः॥१२४॥तत्संदेशंजलधरवरोदि
व्यवाचाचचक्षेप्राणांस्तस्याजनहितरतोरक्षितुंयक्षवध्वाः॥प्राप्यादंतंप्रमुदितमनास्सापि
तस्थौस्वभर्तुः।केषांनस्याद्भिमतफलाप्रार्थनाह्युत्तमेषु॥१२५॥श्रुत्वावार्त्तांजलदकथितां
धनेशोपिसद्यःशापस्यांतंसदयहृदयःसंविधायास्तकोपः।संयोज्यैतौविगलितशुचौदं
पतीहृष्टचित्तौभोगानिष्टानविरत[illegible]सुखंभोजयामासशश्वत्॥१२६॥इत्थंभूतंसुचरितपदं
मेघदूताभिधानंकामक्रीडाविरचितजनेविप्रयुक्तेविनोदः।मेघस्याऽस्मिन्नतिनिपुणता मेघदू०
बुद्धिभावःकवीनांनत्वाऽऽर्यायाश्चरणयुगलंकालिदासश्चकार॥१२७॥इतिश्रीकालिदासकृतौ
मेघदूताभिधानंकाव्यंसमाप्तं॥ ॥संवत् १७०५ वर्षे श्रावणवदि १० बुधे॥ ॥शिवमस्तु॥ ॥श्री १४